National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 163-166
© 2025 NJHSR
www.sanskritarticle.com

**डा. राधा शर्मा**
व्याकरणाचार्या,
सर्वकारीय संस्कृत महाविद्यालय तुङ्गेश,
शिमला, हिमाचलप्रदेशः

**Correspondence:**
**डा.राधा शर्मा**
व्याकरणाचार्या,
सर्वकारीय संस्कृत महाविद्यालय तुङ्गेश,
शिमला, हिमाचलप्रदेशः

# ।।आदेशप्रत्यययोः[1] इति सूत्रविमर्शः।।

**डा. राधा शर्मा**

**अवतरणम् -** इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशरूपस्य प्रत्ययावयवस्य च सस्य स्थाने मूर्धन्यषकारादेशविधानार्थं सूत्रमिदमारब्धं भगवता पाणिनिना ।अस्य सूत्रस्य उदाहरणं सिद्धान्तकौमुद्यां भट्टोजिदीक्षितैः रामेषु इति दत्तम् ।

**पदकृत्यविचारः -**

इण्कोः इति किम् ? रामस्य। अयमर्थः सूत्रेऽस्मिन् इण्कोः इति अधिकारो विद्यते तस्य किं फलमित्यस्य उत्तरमाह भट्टोजिदीक्षितः रामस्येति। अत्र इण्कोः इति पदाभावे सूत्रार्थः इत्थं स्यात् आदेशरूपस्य प्रत्ययावयवस्य च अपादान्तस्य सस्य स्थाने षकारः स्यादिति। ततश्च रामस्य इत्यत्र स्यप्रत्ययस्य अवयवभूतस्य सकारस्य स्थाने षकारस्स्यात्, ततश्च रामस्य इति इष्टसिद्धिः न स्यात्। अतोऽत्र इण्कोः इति पदम्। ततसत्वे तु सूत्रार्थो भवति इण्कर्वगाभ्यां परस्य आदेशरूपस्य प्रत्ययावयवस्य च अपादान्तस्य सस्य स्थाने षकारः स्यादिति। ततश्च रामस्य इत्यत्र इण्कुभ्यां परत्वाभावान्न षत्वापत्तिः।

आदेशप्रत्यययोरिति किम् सुपीः सुपिसौ सुपिसः। अत्र सूत्रे आदेशप्रत्यययोः इति पदाभावे सूत्रार्थः स्यात् इण्कवर्गाभ्यां परस्य अपदान्तस्य सस्य स्थाने षकारः स्यादिति। ततश्च सुपिसौ इत्यादौ धातोः सकारस्य स्थाने अपि षकारापत्तिः। अतः आदेशप्रत्यययोः इति पदं उपात्तम्, अतः सुपिसौ इत्यादौ आदेशरूपस्य प्रत्ययावयवस्य च सकाराभावात् न षकारादेशः।

अपदान्तस्य इति किम् - हरिस्तत्र। अत्र सूत्रे अपदान्तस्य इति पदाभावे सूत्रार्थः स्यात् इण्कर्वगाभ्यां परस्य आदेशरूपस्य प्रत्ययावयवस्य च सकारस्य स्थाने षकारस्स्यादिति। ततश्च हरिस्तत्र इत्यादौ इणः परः आदेशरूपः सकार विद्यते, तेन तत्रापि षकारादेशः स्यात्, स च नेष्टः, अतस्तद्वारणाय सूत्रे अपदान्तस्येति पदम्। ।

**भट्टोजिदीक्षितः**

आदेशप्रत्यययोः इति षष्ठीद्विवचनान्तं पदम् आदेशश्च प्रत्ययश्च आदेशप्रत्ययौ, तयोः आदेशप्रत्यययोः इति इतरेतरयोगद्वन्द्वसमासः। एवञ्च अस्य पदस्य आदेशस्य प्रत्ययस्य च इत्यर्थः। सहेः साडः स इत्यस्मात् सूत्रात् सः इति षष्ठ्यन्तं पदमनुवर्तते। अस्य च सकारस्य इत्यर्थः। अपदान्तस्य मूर्धन्यः इत्यस्मिन् अधिकारे सूत्रमिदं विद्यते। तत्र सूत्रे अपदान्तस्य इति षष्ठ्यन्तं पदम्। तच्च सः इत्यस्य विशेषणम्। मूर्धन्यः इति प्रथमान्तं पदम्। अस्य च मूर्ध्नि भवः इत्यर्थः। इण्कोः इति पञ्चम्येकवचनान्तं पदम् अधिक्रियते। इण् च कुश्च इति इण्कु तस्मात् इण्कोः इति समाहारद्वन्द्वसमासः। तेनास्य इण्कवर्गाभ्यामित्यर्थः। पञ्चमीं दृष्ट्वा तस्मादित्युत्तरस्य इत्यतः परस्य इति पदमुपतिष्ठते। सः इत्यत्र च स्थानषष्ठी विद्यते। अतः षष्ठी स्थानेयोगा इत्यतः स्थाने इति पदमुपतिष्ठते। ततश्च सूत्रार्थो भवति इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशस्य

प्रत्ययस्य च सकारस्य स्थाने मूर्धन्यादेशः स्यादिति। अत्र आदेशस्य प्रत्ययस्य चेत्यत्र या षष्ठी तस्याः सम्बन्धः अर्थः। स च यदि अवयवावयविभावः तदा सूत्रार्थः स्यात् "इण्कवर्गाभ्यां परस्य आदेशावयवस्य प्रत्ययावयवस्य च अपदान्तस्य सस्य मूर्धन्यः स्यात्" इति। अयमर्थः स्वीक्रियते चेत् सिषेध इत्यादौ आदेशावयवस्य, रामेषु इत्यादौ प्रत्ययावयवस्य च षत्वसिद्धावपि, तिसृणाम्, मुसलम् इत्यादौ आदेशावयवस्यापि षत्वं स्यात्, तत्र च षत्वं नेष्टमतः अस्मिन् अर्थे अतिव्याप्तिः विद्यते। तस्मान्नायम् अर्थः युक्तः। यदि आदेशस्य प्रत्ययस्य चेत्यत्र या षष्ठी तस्याः अभेदः सम्बन्धः अर्थः स्वीक्रियते चेत् "इण्कवर्गाभ्यां परस्य आदेशरूपस्य प्रत्ययरूपस्य च अपदान्तस्य सस्य मूर्धन्यः स्यात्" इत्यर्थः स्यात्। ततश्च सिषेध इत्यादौ आदेशरूपस्य सस्य षत्वसिद्धावपि रामेषु इत्यत्र षत्वं न स्यात् तस्य प्रत्ययरूपत्वाभावात्। अतः अस्मिन् अर्थे अव्याप्तिः दोषः विद्यते। तस्मादयमपि पक्षः अयुक्तः। यदि च आदेशस्य इत्यत्र या षष्ठी तस्याः अवयवावयविभावः सम्बन्धः अर्थः, प्रत्ययस्य इत्यत्र या षष्ठी तस्याः अभेदः सम्बन्धः अर्थः, ततश्चास्य सूत्रस्य "इण्कवर्गाभ्यां परस्य आदेशावयवस्य प्रत्ययरूपस्य च अपदान्तस्य सस्य मूर्धन्यः स्यात्" इत्यर्थः स्यात्। ततश्च तिसृणाम्, मुसलम् इत्यादौ अनिष्टस्थले आदेशावयवस्य सस्य षत्वं स्यात्, रामेषु इत्यादौ इष्टस्थले सकारस्य प्रत्ययरूपत्वाभावात् षत्वं न स्यात्। अतः अस्मिन् पक्षे अतिव्याप्तिः अपि विद्यते, अव्याप्तिः अपि विद्यते। तस्मादमपि पक्षः स्वीकर्तुमयोग्यः। यदि च आदेशस्य इत्यत्र या षष्ठी तस्याः अभेदः सम्बन्धः अर्थः, प्रत्ययस्य इत्यत्र या षष्ठी तस्याः अवयवावयविभावसम्बन्धः अर्थः। तेन च अस्य सूत्रस्य अर्थो भवति- "इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशाभिन्नस्य सकारस्य प्रत्ययावयवस्य च सकारस्य स्थाने मूर्धन्यादेशः भवति"। तेन च सिषेध इत्यादौ आदेशरूपस्य सस्य षत्वं स्यात्। रामेषु इत्यादौ प्रत्ययावयवस्यापि सकारस्य षत्वं स्यात्। तिसृणाम्, मुसलम् इत्यादौ च सस्य आदेशरूपत्वाभावात् षत्वं न स्यात्। एवञ्च अत्र पक्षे न कोऽपि दोषः। तस्मादयमेव पक्षः स्वीक्रियते। अत एव भट्टोजिदीक्षितेन सूत्रस्यास्यायमेवार्थः स्वीकृतः। तथा चोक्तं सिद्धान्तकौमुद्याम् "इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्"। काशिकायामपि इत्थमेव प्रोक्तम् "मूर्धन्य इति वर्तते, स इति च। आदेशप्रत्यययोरिति षष्ठी भेदेन संबध्यते। आदेशो यः सकारः प्रत्ययस्य च यः सकारः इण्कोरुत्तरस्तस्य मूर्धन्यो भवत्यादेशः। आदेशस्य तावत् सिषेव। सुष्वाप। प्रत्ययस्य अग्निषु। वायुषु। कर्तृषु। हर्तृषु"। इति।

अथ आदेशप्रत्यययोः इत्यत्र षष्ठी तु एका एव विद्यते। ततश्च सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति नियमेन तस्याः षष्ठीविभक्तेः कश्चिदेकः एवार्थः स्यात्, ततश्च कथं तस्याः द्वौ अर्थौ स्वीकृत्य भट्टोजिदीक्षितेन प्रकृतसूत्रस्यार्थः प्रतिपादितः इत्याशङ्कां निराकर्तुमाह भट्टोजिदीक्षितः "एकाऽपि षष्ठी विषयभेदाद्भिद्यते इत्याशयेन व्याचष्टे आदेशः प्रत्ययावयवश्चेति"[3]। अस्याशयं प्रकटयन्नाह शब्दरत्नकारः - "तन्त्रेण षष्ठीद्वयोच्चारणाद् आदेशरूपसस्य स्थाने प्रत्ययावयवस्य स्थाने च षो भवतीत्येवंरूपः षष्ठीभेद इत्यर्थः। ओस्सम्बन्धद्वयार्थक इत्यभिमानः"। अयमाशयः प्रकृते द्वौ सम्बन्धौ विवक्षितौ अभेदः, अवयवावयविभावश्चेति। ततश्च सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति न्यायेन प्रत्यर्थं शब्दाभिनिवेशः इति न्यायेन वा द्वयोः ङसोः उच्चारणं प्राप्तम्, किन्तु आदेशप्रत्ययरूपायाः प्रकृतेः परत्वेन द्वयोः ङसोः प्रयोगो न सम्भवतीति कृत्वा तन्त्रेण ओसः उच्चारणं कृतं सूत्रकृता। ततः सूत्रस्य अर्थप्रतिपादनकाले आदेशस्य प्रत्ययस्य चेति प्रत्येकं ङसन्तस्य उच्चारणं विधाय लक्ष्यानुसारम् आदेशपदोत्तरषष्ठीविभक्तेः अभेदो वाच्यः, प्रत्ययपदोत्तरषष्ठी-विभक्तेश्च अवयवावयविभावः सम्बन्धो वाच्यः इति अङ्गीकृत्य सूत्रार्थः वर्णनीयः। ततश्च अर्थभेदात् शब्दभेदः इति नियमेन वाच्यस्य सम्बन्धस्य भेदेन वाचिकायाः षष्ठ्याः अपि भेदः स्वीकर्तव्यः इति भावः।

अस्य ग्रन्थस्य तात्पर्यं प्रकटयन्नाह गोपालशास्त्रिमहोदयः सरलाव्याख्यायाम् "षष्ठीभेद इति। आदेशस्य सकारे अभेदेन प्रत्ययस्य च तत्रावयवत्वेन अन्वयविवक्षाया दृष्टत्वेन एकस्याः षष्ठ्याः उभयार्थकत्वाभावात्तस्याः सम्बन्धसामान्यार्थकत्वमाश्रित्य आदेश-सम्बन्धिनः प्रत्ययसम्बन्धिनश्च सस्येति सामान्यतो वाक्यार्थे पश्चाद्विशेषजिज्ञासायाम् आदेशाभिन्नस्य प्रत्ययावयवस्य चेति विशेषतो लक्ष्यसंस्कारकवाक्ये षष्ठीभेद इति भावः"।

एवञ्च भट्टोजिदीक्षितनये इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशरूपस्य प्रत्ययावयवस्य च सकारस्य स्थाने मूर्धन्यः स्यादिति सूत्रार्थः प्रतिफलति।

**अत्र नागेशभट्टः -**

**सूत्रार्थः - इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशरूपस्य प्रत्यय-रूपस्य च सस्य स्थाने मूर्धन्यादेशः स्यात्।**

नागेशभट्टानां मते प्रकृतसूत्रे प्रत्ययशब्दो लक्षणया प्रत्ययावयवपरः। तथा चोक्तं नागेशभट्टेन "प्रत्ययशब्दस्तदवयवपरो व्याख्यानात्, सातेः षत्वनिषेधाल्लिङ्गाच्च[4]"। अत्र व्याख्यानञ्च प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रे प्रत्ययलोपे इत्यत्र प्रत्ययपदग्रहणमेव। तथाहि लोपे प्रत्ययलक्षणम् इत्येव सूत्रं भवतु। आदेशप्रत्यययोः इत्यतः प्रत्ययस्य इत्यस्य अनुवृत्तिं विधाय प्रत्ययस्य लोपे प्रत्ययलक्षणमित्यर्थः भविष्यति। ततश्च प्रत्ययलोपे इत्यत्र प्रत्ययपदं व्यर्थं स्यात्। तदेव व्यर्थीभूय बोधयति प्रकृतसूत्रे प्रत्ययशब्दः प्रत्ययावयवपरः। ततश्च प्रत्ययावयवबोधकस्य प्रत्ययपदस्य अनुवृत्तौ प्रत्ययावयवस्य लोपे प्रत्ययलक्षणं भवति, इत्यर्थः स्यात्, स चार्थो नेष्टः, अतः प्रत्ययलोपे प्रत्ययलक्षणमिति सूत्रे प्रत्ययलोपे इत्यत्र प्रत्ययपदस्य ग्रहणं कृतम्। सात्पदाद्योः इति सूत्रे सातेः ग्रहणमपि प्रमाणम्। तथाहि आदेशप्रत्यययोः इति सूत्रे प्रत्ययशब्दस्य प्रत्ययावयवाबोधकत्वे सातेः सकारस्य मूर्धन्यादेशो नैव प्राप्तः, ततश्च सातेः सकारस्य मूर्धन्यादेशाप्राप्तौ तन्निषेधाय सात्पदाद्योः इति सूत्रे सातेः ग्रहणं व्यर्थं स्यात्। तदेव व्यर्थीभूय ज्ञापयति यत् आदेशप्रत्यययोः इत्यत्र प्रत्ययशब्दः प्रत्ययावयवपरः। ततश्च सातेः सकारस्यापि मूर्धन्यादेशः प्राप्तः, तन्निषेधाय सात्पदाद्योः इत्यत्र सातेः ग्रहणं सार्थकं भवति। एवञ्च प्रत्ययशब्दः प्रत्ययावयवपरः इति सिद्धम्। ततश्च आदेशप्रत्यययोः इत्यत्र षष्ठीविभक्तेः अभेदः एवार्थः। तेन च नागेशभट्टमते प्रकृतसूत्रस्य अर्थः भवति इण्कवर्गाभ्यां परस्य अपदान्तस्य आदेशरूपस्य प्रत्ययावयवरूपस्य च सस्य स्थाने मूर्धन्यादेशः स्यात्[5]। एवञ्च सिषेध इत्यादौ आदेशाभिन्नस्य, रामेषु इत्यादौ प्रत्ययावयवस्य च षत्वं सिध्यति। एवमेवान्यत्रापि बोध्यम्।

**अत्रायं विशेषः -**

अथ दधिसेचौ इत्यत्र प्राक् सुबुत्पत्तेः समासे आदेशप्रत्यययोः इत्यनेन प्राप्तस्य षत्त्वस्य सात्पदाद्योः इत्यनेन निषेधाय पदादिशब्दे पदात् आदिः पदादिः इति समासः स्वीकृतः। ततश्च अस्मिन् पक्षे अस्य सूत्रस्य अर्थो भवति सातेः सकारस्य, पदात् परस्य आदेः सकारस्य च षत्वं न भवति। ततश्च दधिसेचौ इत्यत्र अन्तर्वर्तिविभक्त्या दधिपदं विद्यते, तस्मात् परः आदिः सकारः सेचः इत्यस्य विद्यते। अतस्तस्य षत्वं न भवति। तथैव रामेषु इत्यत्र रामे इत्यस्य स्वादिष्वसर्व-नामस्थाने इत्यनेन पदत्वात्, तस्मात् परस्य सुपः आदेः सकारस्य षत्वनिषेधे रामेषु इति इष्टं रूपं न स्यादिति चेदुच्यते स्वादिष्वसर्वनामस्थाने इत्यनेन यस्य पदसंज्ञा तामाश्रित्य सात्पदाद्योः इति निषेधो न प्रवर्तते। अत्र च सात्पदाद्योः इत्यत्र सातिग्रहणमेव प्रमाणम्। तथाहि अग्निसादित्यादौ आदेशप्रत्यययोः इत्यनेन प्राप्तस्य षत्वस्य निषेधाय सात्पदाद्योः इत्यत्र सातिग्रहणं कृतम्। किन्तु पञ्चमीसमासपक्षे अग्निसादित्यादौ अग्नेः पदत्वेन तस्मात् परः आदिः सकारः सातेः तस्य स्थाने षत्वस्य निषेधः पदादेः इत्यंशेनैव सिद्धः। ततश्च सात्पदाद्योः इत्यत्र सातिग्रहणं व्यर्थीभूय बोधयति यत् स्वादिष्वसर्वनामस्थाने इत्यनेन यस्य पदसंज्ञा तस्मात् परस्य पञ्चमीसमासपक्षस्य अर्थेन षत्वस्य निषेधो न भवति। तथा चोक्तं भट्टोजिदीक्षितेन प्रौढमनोरमायाम् "ननु दधिसेच इत्यादौ प्राक् सुबुत्पत्तेः समासे षत्वं वारयितुं पदादादिः पदादिरिति पञ्चमीसमासो भाष्ये उक्तः। ततश्चेहापि सात्पदाद्योः इति निषेधः स्यादिति चेत् मैवम्, स्वादिष्विति या पदसंज्ञा तामाश्रित्योक्तनिषेषो न प्रवर्तते इति सातिग्रहणेन ज्ञापितत्वात्[6]"।

अत्र केचन वदन्ति यत् सात्पदाद्योः इत्यत्र सातिग्रहणेन ज्ञाप्यते यत् प्रत्ययविषये पञ्चमीसमासोक्तनिषेधः न प्रवर्तते इति। ततश्च न रामेषु इत्यादौ षत्वनिषेध इति। किन्तु अयं पक्षः अयुक्तः। यतोहि व्यतिसे इत्यत्र आदेशप्रत्यययोः इत्यनेन सेप्रत्ययस्य अवयवस्य सकारस्य षत्वं प्राप्तम्। किन्तु प्रकृते व्यतिपदात् परस्य आदेः से इत्यस्य सकारस्य पदात् परस्य आदेः सकारस्य षत्वं न इत्यर्थकेन सात्पदाद्योः इति सूत्रेण निषेधो भवति। किन्तु प्रत्ययविषये उक्तनिषेधाप्रवृत्तौ षत्वापत्तिः स्यात्। अत्र च षत्वं नेष्टम्। तस्मात् प्रत्ययविषये पञ्चमीनिषेधो न प्रवर्तते इति पक्षो न युक्तः। किन्तु स्वादिष्वसर्वनामस्थाने इत्यनेन यस्य पदसंज्ञा, तादृशपदमाश्रित्य सात्पदाद्योः इति निषेधो न प्रवर्तते इत्येव ज्ञापनं युक्तम्। ततश्च व्यतिसे इत्यत्र नहि व्यति इत्यस्य स्वादिष्वसर्वनामस्थाने इत्यनेन पदसंज्ञा अपितु सुप्तिङन्तं पदम् इत्यनेन पदसंज्ञा। ततश्च अत्र सात्पदाद्योः इत्यनेन निषेधो भवत्येवेति भावः। तथा चोक्तं भट्टोजिदीक्षितेन प्रौढमनोरमायाम् यत्त्वाहुः प्रत्ययविषये नायं निषेध इति ज्ञाप्यते। तन्न व्यतिसे इत्यादौ षत्वापत्तेः।

अथ सात्पदाद्योः इत्यस्मिन् सूत्रे पदस्य आदिः इति षष्ठीतत्पुरुष-पक्षेऽपि व्यतिसे इत्यादौ दोषो भवति। तथाहि अत्र पक्षे सात्पदाद्योः इत्यस्यार्थो भवति सातेः सकारस्य पदादेः सकारस्य च षत्वं न भवति। एवञ्च व्यतिपूर्वकात् असिति धातोः लट्। ततः तस्य लटः स्थाने कर्तरि कर्मव्यतिहारे इति सूत्रेण आत्मनेपदस्य मध्यमपुरुषस्य अनुबन्धलोपे व्यति अस् थास् इति जाते थासः स्थाने थासः से

इत्यनेन से इत्यादेशे व्यति अस् से इति जाते श्नसोरल्लोपः इत्यनेन असः अकारस्य लोपे, तासस्त्योर्लोपः इत्यनेन असः सकारस्य लोपे व्यतिसे इति रूपं भवति। अत्र से इति प्रत्ययावयवः सकारो विद्यते। स च इणः परः अस्ति। अतः सेप्रत्ययस्य सकारस्य स्थाने आदेशप्रत्यययोः इति सूत्रेण सकारः प्राप्तः। तस्य च सात्पदाद्योः इत्यनेन निषेधो न स्यात्, से इत्यस्य अपदत्वात् इति चेदुच्यते से इदमपि पदमस्ति। यतोहि व्यति अस् से इति अवस्थायाम् अस् से इति समुदायस्य तिङन्ततदादित्वात् सुप्तिङन्तं पदमित्यनेन पदसंज्ञा भवति। सैव पदसंज्ञा प्रकृतिभागस्य असः इत्यस्य लोपानन्तरं से इत्यत्र एकदेशविकृतमनन्यवदिति न्यायेन समायाति। अतः से इति पदं विद्यते, अतः प्रकृते सकारः पदादिरस्ति। अतः सात्पदाद्योः इति सूत्रेण निषेधः सिध्यति। तथा चोक्तं भट्टोजिदीक्षितेन "ननु पदस्यादिरिति पक्षे व्यतिसे इत्यत्र षत्वं दुर्वारम्। न च व्यपदेशिवद्भावेन से इत्यस्यापि तिङन्तत्वात्पदत्वं शङ्क्यम्। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात्। अन्यथा रामेषु इत्यादावपि षत्वनिषेधापत्तिरिति चेत् सत्यम्। न वयं प्रत्ययमात्रस्य तदन्ततां ब्रूमः[7], किं तु प्रकृतिप्रत्ययसमुदाये प्रवृत्तां पदसंज्ञामेक-देशविकृतन्यायेन लुप्तप्रकृतिके प्रत्ययेऽप्यानयामः। रामौ रामाः इत्यादावपि हि एकदेशविकृतन्यायेनैव पदत्वम्। एकादेशात्प्रागेव पदसंज्ञाप्रवृत्तेः। न त्वेकादेशे कृते सुप्तिङन्तम् इत्यस्य प्राप्तिरस्ति। उभयतः आश्रयणे नान्तादिवदिति सिद्धान्तात्"।

**सन्दर्भग्रन्थसूची**


- प्रदीपोद्योतसहितं महाभाष्यम्, चौखम्बा सुरभारतीप्रकाशनम, 2021॥
- षड्व्याख्यासमन्वितः लघुशब्देन्दुशेखरः, चौखम्बासुरभारती-प्रकाशनम्॥
- नागेशभट्टरचितपरिभाषेन्दुशेखरः, भूतिभूषितः चौखम्बासंस्कृत-प्रतिष्ठानम् 2012॥
- श्रीमद्भट्टोजिदीक्षितप्रणीतसिद्धान्तकौमुदी,तत्त्वबोधिनीबालमनोरमाशेखरभोषिता, चौखम्बासुरभारतीप्रकाशनम्, 2067॥
- भैरवीसहितशब्दरत्नसहितप्रौढमनोरमा, चौखम्बा संस्कृत सीरिज आफिस, 1992॥
- श्रीमद्भट्टोजिदीक्षितप्रणीतसिद्धान्तकौमुदी, लक्ष्मीव्याख्यासमन्विता मोतीलाल बनारसी दासः, 1966॥


**सन्दर्भग्रन्थाः**

[1] अष्ट. 8.3.59

[2] सि.कौ.पृ.सं.205

[3] प्रौ.म.पृ.सं.412

[4] ल.श.शे.पृ.सं.144

[5] ल.श.शे.पृ.सं.144

[6] प्रौ.म.पृ.सं.412

[7] प्रौ.म.पृ.सं.412